
ISSN 0975-4067

# KIRAṆĀVALĪ

## Journal of Sanskrit Research Foundation

The New Trivandrum Sanskrit Series
Vol.XIV, Book. III -IV

JULY - DECEMBER 2022



SRFT

किरणावली
Sanskrit Research Foundation
Thiruvananthapuram

// KIRAṆĀVALĪ

**Journal of Sanskrit Research Foundation**

**Editor**

**Prof. Dr.M. Manimohanan**

Sree Sankaracharya University of Sanskrit, Kalady

dr.m.manimohanan@gmail.com

**Executive Editor**

**Prof. Dr.C.S.Sasikumar (Rtd.)**

Sree Sankaracharya University of Sanskrit, Kalady

**drsasikumarcs@gmail.com**

**Managing Editor**

**Prof. Dr.G.Narayanan**

Sree Sankaracharya University of Sanskrit, Kalady

dr.g.narayanan@gmail.com

**Editorial board**

Dr.V.Sisupalapanikkar,Professor of Sanskrit(Rtd.) Uty. of Kerala
Dr.R.Vijayakumar, Professor of Vyakarana(Rtd.), S.S.U.S.Kalady
Dr.K.Muthulakshmi, Professor of Vedanta, S.S.U.S. Kalady
Dr.K.K.Sundaresan, Associate Professor in Vedanta, SSUS.Kalady
Dr.P.K.Dharmarajan, Professor of Sahitya, (Rtd) S.S.U.S. Kalady
Dr.S.Sobhana, Professor of Vedanta (Rtd), S.S.U.S.Kalady
Dr.T.Devarajan, Professor of Sanskrit (Rtd), University of Kerala
Dr.P.Chithambaran, Professor of Vedanta (Rtd),S.S.U.S. Kalady

**Associate Editor**

**Dr.R.Jinu**

dr.rjinu@gmail.com

# *Contents*


The tantric concept in "Vātāpi Gaṇapatiṁ bhaje"-A study
Dr.Pradeep Varma.P.K 7
Śākta Brahmins of Kerala and their rituals with esoteric and exoteric dimensions Dr. Ajithan. P. I 14
Lanka's Princess as an Art of Reclaiming Beauty
Dr. M S Gayathri Devi 37
Role of Ayurveda in Geriatric Nutrition
Dr. Gopikrishnan P. T., ,Dr. Haritha Chandran,
Dr. Haroon Irshad 51
Manuscriptology: An Overview -
Dr. Keerthi P, Prof. Ramadas P.V. Dr. Haritha Chandran,
Dr. Leena P.Nair 58
Spell Checker for Sanskrit Sentences based on Morphological Analysis- Dr. Namrata Tapaswi 66
Appreciation of Muttusvami Dikshitar's Navāvaraṇa Kṛti in the Raga Śankarabharanam. - Mr. Ratheesh P R 77
A Reference Frame for Self-Studies and Self-Regulatory Mechanism of Vedas: Personality Changes - [Swami Parmarth Dev,
Sadvi Dev Priya, Anjali Prabhakar and Paran Gowda] 85
Taxation in Dharmaśāstra - Dr. Tarak Jana 100
Developmental Stages of *Camatkāra* in Sanskrit Poetics
Dr. Sudip Chakravortti 114
Elevating the modern educational experience: Correlating 'Practical Vedanta' and 'Bratacārī' - Dr Anusrita Mandal 124
Dharma: The Bed Rock of Social Philosophy of Renaissance Thinkers of Kerala. - Rakesh. K 134
The Concept of Pratibhā and its Implications; Gleanings from Vākyapadīya - Dr. Sarath P Nath 144
Vaijayantīkośa- Nature and Methodology- Athira.T 153
Analytical study of Śabda - Dr.N.S.Sharmila 167
Temple architecture: Classification and characteristics
Dr S Radhakrishnan 173
Knowledge of the Heart in Ādi Śaṅkarācārya's Upaniṣad Commentary Jyothi. L 181
The Tradition of Nyaya in Kerala - Niveditha Sathyan 187
Drona: The Practitioner of Injustice - Dr. G. Reghukumar 195
Karma Yoga Concept in Shrimad Bhagavad Gita: A Conceptual Frame Development - Anjali Prabhakar and Paran Gowda 202
Śrī Jagannāth and Vaiṣṇavism - Dr.Nilachal Mishra 211
Morals and Teaching of Values for Human Being in Shrimad Bhagavad Gita - Ramesh Kumar Awasthi 217

Status of Women Depicted in Manusmriti - Dr. Shylaja S 223
Authoritative Works on Rāja Yoga - A Brief Reflective
Sunitha S. 235
Rig Veda and Astronomy - Girish V. 242
Traces of Śivadharma and Śivadharmottara in the Śaiva Scriptures of Odisha - Dr. Anil Kumar Acharya 247
तत्त्वशास्त्रे चित्सुखप्रकाशितं स्वप्रकाशत्वमित्यद्वैततत्त्वम् - डा.सि.आर् सन्तोष् 260
श्रीहरिनामामृतपाणिनीयव्याकरणयोरच्सन्धिप्रकरणस्य तुलनात्मकमध्ययनम्
डॉ.प्रीतिलक्ष्मी स्वाँई 271
कुमारसम्भवस्य तिङन्तपदानि - मल्लिनाथीयविवेचनम् - विश्वबन्धु उपाध्याय: 278
योगवासिष्ठरामायणे शास्त्रव्याख्यानकौशलविमर्शः- अमृता घोषः 282
उपनिषदि ब्रह्मस्वरूप-विमर्शः अम्बरीष दासः 289
रसगङ्गाधरे नव्यन्यायभाषाशैली डा. के . रतीष् 294
धातुवृत्तयः धातुकोशाश्च डॉ. जयदेवदिण्डा 298
वाक्यपदीये वाक्यस्वरूपम् ड० मलयपोडे 312
मनुसंहितालिखितायां समाजव्यवस्थायां नारीणां पदम् : दूषणं तत्प्रतिकारश्च
प्रशान्त कर्मकार् 320
वैयाकरणमतमनुसृत्य प्रतिभास्वरूपविचारः डा० राजीवः पी.पी 329
ज्योतिर्गणितपद्धतीनां परिचयः डा. हरिनारायणन् 334
अद्वैतनयेसत्तास्वरूपविमर्शः डा. निषाद् टि.एस् 339
भवभूतेर्कृतिषु सांख्ययोगमीमांसादर्शनतत्त्वानामन्वेषणम् - डा० तानिया सिकदार 342
पाणिनीयव्याकरणे सूत्राणामेकवाक्यताविमर्शः - डॉ.मनीषकुमारझाः 347
सर्वङ्कषाटीकायां व्याकरणालोचने मल्लिनाथस्य कतिपयाऽनवधानता - मृत्युञ्जयगराँइ 354
परमपुरुषार्थसिद्धये भक्तिमार्गः शुभाङ्कर बसकः 361
कातन्त्रव्याकरणसूत्रपरिचयः डा०टि.वि गिरिजा 367
अष्टाध्याय्यां विभाषाधिकारेऽपि नित्यसमासविधानम् पङ्कजराउलः 370
अलुक्समासविमर्शः राजकुमार-मण्डलः 374
मधुसूदनसरस्वतीप्रणीते कृष्णकुतूहले भक्तिरसविमर्शः - रिक्ता मण्डलः 380
जैनरीत्या बौद्धसम्मतप्रमाणलक्षणसमीक्षणम् - श्रीशशांकशेखरपात्रः 388
जनकल्याणे नीतिशतकस्य माहात्म्यम् समीरणः रायः 396
विभावना-विशेषक्तयोः समीक्षात्मकपर्यालोचनम् शान्तनुः प्रधानः 401
संस्कृतव्याकरणदिशा ओडिआभाषायाः समीक्षणम् - शिवानन्द बेहेरा 403
आचार्यधर्मकीर्तिकृतविविधसम्बन्धस्वरूपदूषणं तन्निराकरणञ्च - सुजन-दासः 409
कादम्बरीहर्षचरितयोर्बाणभट्टस्य काव्यसौन्दर्यम्- प्रो. प्रसूनदत्तसिंहः, सुपर्णा सेनः 414
शिवसङ्कल्पः स्वरूपश्च पौराणिकग्रन्थेषु डा.बिन्दुश्री के.एस् 419
न्यायसिद्धान्तमुक्तावल्यनुसारेण शब्दप्रमाणनिरूपणम् - अश्वति एस् 422
वराहमिहिरस्य जीवचरितम् - बि. नागराजः, डा. यादव 429
उपनिषद्ग्रन्थेषु पर्यावरणम्- एकमध्ययनम् डा० गोबिन्दसर्कार 432
रामायणमहाकाव्ये मोक्षस्य अवधारणा तरणीकुमारपण्डा 437
अक्षपाददर्शनम् डा. एस्. शिवकुमारः 445
सांख्ययोगौ पृथग्बालाः प्रवदन्ति न पण्डिताः डा.अरविन्दमहापात्रः 451
Submission & Subscription 460

# *अलुक्समासविमर्शः*

**राजकुमार-मण्डलः**[1]

***प्रबन्धसारः***

दृष्टिभेदेन समासस्य अनेकधा प्रभेदाः सम्भवन्ति। तत्र समासप्रक्रियायाम् अलौकिकविग्रहवाक्यस्य समासे क्रियमाणे प्रातिपदिकसंज्ञायां सत्यां "सुपो धातुप्रातिपदिकयोः" इति सूत्रेण समासघटकसुब्विभक्तीनां लुक् भवति। लुकि जाते लुक्समासः इत्येकः प्रभेदः। अस्य लुकः निषेधे समासघटकपूर्वपदघटकविभक्तेरलुकि अलुक्समास इति समासस्य अपरः प्रभेदः। 'अलुक्समासविमर्शः' इत्याख्ये शोधप्रबन्धे मुख्यतः द्वयोः प्रश्नयोः समाधानं विमृश्यते। अलुक्समासस्य प्रवृत्तिबीजभूततत्त्वमित्येकः विषयः। समस्ते असमस्ते च अलुक्समासे क्वचित् समानमेव रूपं दृश्यमानं भवति। तत्र समस्ताऽसमस्तयोः भेदग्रहः कथं सम्भवतीति द्वितीयः प्रश्नः। अनयोः विषययोः प्रतिपादनाय आनुषङ्गिकतया विषयान्तराण्यपि प्रतिपादितानि। यथा, समासभेदाः, अलुक्समासस्वरूपं, अलुक्समासप्रयोजनं, अलुक्समासप्रक्रिया चेति।

## *उपोद्घातः*

भावस्य प्रकटनाय प्रस्फुटिता भाषा भाषणेनैव स्वोपयोगितां प्राप्नोति। किञ्च, सर्वत्र संक्षेपीकरणं प्राणिनां स्वभावभूतम्। एवं, भाषाव्यवहारेऽपि प्रवृत्तिरियं भाषाप्रादुर्भावकालादेव परिलक्ष्यते। अल्पीयसा शब्देन विस्तृतार्थस्य बोधने समासोऽन्यतम उपायः। महाभाष्यस्य आदिपर्वणि समासव्यासाभ्यामेव भाषाव्यवहारः प्रोक्तः-

"विस्तीर्य हि महज्ज्ञानमृषिः सङ्क्षिप्य चाब्रवीत्।
इष्टं हि विदुषां लोके समासव्यासधारणम्" ॥ इति।

शब्दानुशासनाय प्रवृत्ते व्याकरणशास्त्रे तु लाघवस्य महती प्रशंसा वर्तते। तत्र शब्दानुशासनस्य पञ्चसु प्रयोजनेषु लाघवमन्यतमम्। तदुक्तं महाभाष्यकारैः- "रक्षोहागमलघ्वसन्देहाः प्रयोजनम्" इति। लाघवस्य महत्त्वं प्रतिपादयन्ती वैयाकरणनिकाये प्रसिद्धा परिभाषा- "अर्धमात्रालाघवेन पुत्रोत्सवं मन्यन्ते वैयाकरणाः" इति। तत्र अल्पीयसा शब्देन विशदार्थस्य बोधनात् समासस्य लाघवत्वं संशयरहितमेव।

समुपसर्गपूर्वकात् सत्तार्थे विद्यमानात् अस्धातोः भावेऽर्थे घञ्प्रत्यये समासशब्दः निष्पद्यते। समसनमित्यर्थः भावे घञ्प्रत्यये। समसनञ्च संक्षेपः, अर्थात् अनेकपदस्य एकपदत्वेन संक्षेपः समासः। पुनः, "अकर्तरि च कारके संज्ञायाम्" (अष्टाध्यायी, ३.३.१९) इति सूत्रेण कर्मणि घञ्प्रत्यये

1 Rajkumar Mondal, Research Scholar, Ramakrishna Mission Vivekananda Educational & Research Institute, Belur Math, Howrah, West Bengal, India, 711202, Email : rajkumar.mondal.rkmvu@gmail.com

समासशब्दः निष्पद्यते। कर्मसाधने घञि समस्यमानमित्यर्थः समासपदस्य। सूत्रार्थस्य कथने भट्टोजिदीक्षितैः सर्वत्रैव 'समस्यते' इति क्रियापदस्य व्यवहारः कृतः। अनेन प्रकृते कर्मण्येव घञ् स्वीकार्य इति तत्त्वबोधिनीकारस्य आशयः। तदाह ज्ञानेन्द्रसरस्वती- "समसनं समासः, भावे घञ्। अनेकस्य पदस्य एकपदीभवनमित्यर्थ इत्येके। वस्तुतस्तु अकर्तरि कारके इति कर्मणि घञ्। अन्यथा सुबन्तं समस्यते इत्युत्तरग्रन्थो न संगच्छते" इति। पाणिनितन्त्रे समासाधिकारपठितत्वं समासत्वमिति समासस्य लक्षणम्। तत्र "प्राक्कडारात्समासः" (अष्टाध्यायी, २.१.३) इति सूत्राधिकारपठितसंज्ञात्वं समासत्वमिति फलति। तत्र समासे एकार्थीभावसामर्थ्यं, वाक्ये च व्यपेक्षाभावसामर्थ्यमङ्गीक्रियते व्याकरणसम्प्रदायैः। तस्मात्, एकार्थीभावापन्नपदसमुदायविशेषत्वं समासत्वमिति समासस्य लक्षणं भवितुमर्हति।

## *शोधविषयः*

भेदनिमित्तमाश्रित्य समासस्य अनेकधा भेदाः सम्भवन्ति। तत्र समासप्रक्रियायाम् अलौकिकविग्रहवाक्यस्य समासे क्रियमाणे प्रातिपदिकसंज्ञायां सत्यां "सुपो धातुप्रातिपदिकयोः" इति सूत्रेण समासघटकसुब्विभक्तीनां लुक् भवति। अस्य लुकः अलुकि अलुक्समास इति समासस्य अन्यतम एकः प्रभेदः।

'अलुक्समासविमर्शः' इत्याख्ये शोधप्रबन्धे मुख्यतः द्वयोः प्रश्नयोः समाधानं विमृश्यते। अलुक्समासस्य प्रवृत्तिबीजभूततत्त्वमित्येकः विषयः। समस्ते असमस्ते च अलुक्समासे क्वचित् समानमेव रूपं दृश्यमानं भवति। तत्र समस्ताऽसमस्तयोः भेदग्रहः कथं सम्भवतीति द्वितीयः प्रश्नः। अनयोः विषययोः प्रतिपादनाय आनुषङ्गिकतया विषयान्तराण्यपि प्रतिपादितानि। यथा, समासभेदाः, अलुक्समासस्वरूपं, अलुक्समासप्रयोजनं, अलुक्समासप्रक्रिया चेति।

## *समासभेदाः*

तत्र दृष्टिभेदे समासस्य अनेके भेदाः भवन्ति। यथा, समासात्मकसमुदायघटकपूर्वपदघटकविभक्तेः लुगलुग्भेदेन समासः द्विधा विभक्तः- लुक्समासः, अलुक्समासः। विग्रहवाक्यस्य सत्त्वाऽसत्त्वाभ्यां समासो द्विधा- नित्यसमासः, अनित्यसमासश्चेति। पुनः, समासघटकपदार्थस्य प्राधान्यमाश्रित्य समासः पञ्चधा- पूर्वपदार्थप्रधानः, मध्यपदार्थप्रधानः, अन्त्यपदार्थप्रधानः, सर्वपदार्थप्रधानः, अन्यपदार्थप्रधानश्चेति। पूर्वोत्तरपदयोः वैशिष्ट्येन समासस्य षट् भेदाः भवन्ति। तदुक्तं प्राचीनैः-

"सुपां सुपा तिङा नाम्ना धातुनाथ तिङां तिङा।
सुबन्तेनेति विज्ञेयः समासः षड्विधो बुधैः"॥ इति।

किञ्च, अवान्तरभेदानां स्वीकारे समासस्य अष्टाविंशतिः प्रभेदाः सम्भवन्तीति वाररुचसंग्रहे प्रोक्तम्-

"तत्राष्टधा तत्पुरुषः षड्विधः कर्मधारयः।
षड्विधश्च बहुव्रीहिर्द्विगुराभाषितो द्विधा"॥ इति।

परन्तु, भगवता सूत्रकारेण साक्षात् चत्वारः समासाः उल्लिखिताः। तत्र "अव्ययीभावः" (अष्टाध्यायी, २.१.५), तत्पुरुषः (अष्टाध्यायी, २.१.२२), शेषो बहुव्रीहिः (अष्टाध्यायी, २.२.२३), चार्थे द्वन्द्वः (अष्टाध्यायी, २.२.२९) इति चतुर्भिः सूत्रैः चत्वारः समासप्रभेदाः सूत्रकारस्य सम्मताः। कर्मधारयद्विगोश्च नाम्ना उल्लेखेऽपि तत्पुरुषस्य भेदविशेषावेतौ इत्यत्र नास्ति विप्रतिपत्तिः। एवम्, अव्ययीभावः, तत्पुरुषः, बहुव्रीहिः, द्वन्द्व इति समासस्य चतुर्धा भेदः।

## *अलुक्समासस्वरूपम्*

अलुक्समासस्य स्वरूपज्ञानात् प्राक् समासप्रक्रिया आदौ ज्ञातव्या। राजपुरुष इत्यत्र राज्ञः पुरुष इति लौकिकं विग्रहवाक्यम्। समासस्तु अलौकिकविग्रहवाक्ये विधीयते। एवं, राजन् ङस् पुरुष सु इति हि अलौकिकं विग्रहवाक्यम्। अत्र षष्ठी इति सूत्रेण समासे जाते कृत्तद्धितसमासाश्च इति सूत्रेण राजन् ङस् पुरुष सु इति समुदायस्य प्रातिपदिकसंज्ञा जायते। ततः प्रातिपदिकसंज्ञायां सत्यां "सुपो धातुप्रातिपदिकयोः" इति सूत्रेण राजन् ङस् पुरुष सु इति प्रातिपदिकसंज्ञकस्य समुदायस्य घटकयोः ङस्सोः विभक्त्योः लुक् क्रियते। ततः समुदायात् पुनः विभक्तौ क्रियमाणायां राजपुरुषः इति प्रयोगार्हं रूपं सेत्स्यति। अत्र लुकः प्रवृत्तेरयं लुक्समासः।

अलुक्समासस्य प्रक्रियाऽत्र निरूप्यते। स्तोकात् मुक्त इति लौकिकं विग्रहवाक्यम्। स्तोक ङस् मुक्त सु इति अलौकिकं विग्रहवाक्यम्। अत्र "स्तोकान्तिकदूरार्थकृच्छ्राणि क्तेन" (अष्टाध्यायी, २.१.३९) इति सूत्रेण तत्पुरुषसमासो विधीयते। तेन स्तोक ङस् मुक्त सु इति समुदायस्य कृत्तद्धितसमासाश्च इति सूत्रेण प्रातिपदिकसंज्ञा भवति। ततः सुपो धातुप्रातिपदिकयोः इति सूत्रेण ङसः सुविभक्तेश्च लुक् प्राप्नोति। पञ्चम्याः स्तोकादिभ्यः इति सूत्रेण केवलं स्तोकशब्दोत्तरङस्विभक्तेः अलुक् विधीयते। तेन सुपो धातुप्रातिपदिकयोः इति सूत्रेण सुविभक्तेः लुक् भवति। ङसः लुक् तु न भवति अलुग्विधानात्। एवं, समासस्य पूर्वपदघटकविभक्तेः अलुकि सति स्तोकान्मुक्तः इति समस्तरूपं निष्पद्यते। एवं, पूर्वपदघटकविभक्तेः अलुक्मात्रविधानेन अलुक्समास इति अभिधा सम्प्रदाये।

## *अलुक्समासप्रयोजनम्*

"प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते" इति अभियुक्तोक्तेः समासस्यापि अस्ति किञ्चित्प्रयोजनम्। समासस्य प्रयोजनमुक्तं सारस्वते- "ऐकपद्यमैकस्वर्यमेकविभक्तिकत्वञ्च" इति। एवं, समासे सति अनेकपदानामैकपद्यम्, अनेकपदानामैकस्वर्यम्, अनेकपदानामेकविभक्तित्वञ्च सिद्धं भवति। "तत्पुरुषः समानाधिकरणः कर्मधारयः" (अष्टाध्यायी, १.२.४२) इति सूत्रस्य भाष्ये भाष्यकृद्भिरपि प्रोक्तं- "अयं तत्पुरुषोस्त्येव प्राथमकल्पिको यस्मिन्नैकपद्यमैकस्वर्यमेकविभक्तित्वं च" इति। एवं, समासस्य शास्त्रे त्रीणि प्रयोजनानि प्रतिपादितानि।

अनेकपदानामेकपदीभवनमेकं प्रयोजनं समासस्य। यथा, राज्ञः पुरुषः इत्यत्र राज्ञः इति एकं पदं, पुरुषः इत्यपरं पदम्। एवमत्र, वाक्ये द्वे पदे स्तः। समासे क्रियमाणे राजपुरुषः इति एकमेव पदं निष्पन्नं भवति।

अनेकस्वराणामेकस्वरीभवनमिति द्वितीयं प्रयोजनम्। यथा, राज्ञः पुरुषः इत्यत्र द्वयोः पदयोः आद्युदात्तस्वरः विद्यते। द्वयोः पदयोः "ञ्नित्यादिर्नित्यम्" (अष्टाध्यायी, ६.१.१९७) इति सूत्रेण नित्त्वप्रयुक्त आद्युदात्तस्वरो वर्तते। अत्र राजन् इति शब्दः कनिन्प्रत्ययान्तः, पुरुषशब्दः कुषन्प्रत्ययान्तो वर्तते। एवं, वाक्ये विद्यमानानि पदान्याश्रित्य स्वराः भवन्ति। समासे क्रियमाणे राजपुरुष इत्यत्र "समासस्य" (अष्टाध्यायी, ६.१.२२३) इति सूत्रेण अन्तोदात्तस्वरो जायते। एवं, वाक्ये द्वौ स्वरौ प्रवृत्तौ, समासे तु एक एव स्वरः प्रवृत्त इति अनेकस्वराणामैकस्वर्यमिति द्वितीयं प्रयोजनं सेत्स्यति समासस्य।

अनेकविभक्तीनाम् एकविभक्तित्वं तृतीयं प्रयोजनं समासस्य। सुबन्तस्य तिङन्तस्य च पदसंज्ञा जायते व्याकरणशास्त्रे। वाक्ये नैकानि पदानि भवन्ति। "आकाङ्क्षायोग्यतासत्तियुक्तः पदोच्चयः" वाक्यम् इति वाक्यस्य लक्षणम्। राज्ञः पुरुषः इत्यत्र द्वयोः स्वतन्त्रपदयोः साधुत्वाय द्वे विभक्ती

प्रयुक्ते स्तः। समासे जाते राजपुरुषः इत्येकमेव पदम्। तस्मात्, एकस्य पदस्य साधुत्वाय एकैव विभक्तिः क्रियत इति अनेकविभक्तीनामएकविभक्तित्वमिति तृतीयं प्रयोजनं सेत्स्यति समासस्य। स्तोकान्मुक्त इति अलुक्समासेऽपि त्रीण्यपि प्रयोजनानि सुतरां सेत्स्यन्ति।

## *अलुग्विधानसरणिः*

भगवता सूत्रकारेण अलुग्विधानाय "अलुगुत्तरपदे" (अष्टाध्यायी, ६.३.१) इत्यधिकारसूत्रं व्यरचि। सूत्रमिदं षष्ठाध्यायस्य तृतीयपादस्य प्रथमसूत्रम्। अलुगधिकारः प्रागानङः, उत्तरपदाधिकारः आपादसमाप्तेः। अस्य अधिकारसूत्रस्य गमनात् "पञ्चम्याः स्तोकादिभ्यः" (अष्टाध्यायी, ६.३.२) इति सूत्रस्यार्थो भवति स्तोकादिभ्यः पञ्चमीविभक्तेः अलुक् स्यादुत्तरपदे परतः। तस्मात्, स्तोकान्मुक्तः इत्यत्र उत्तरपदे परतः अलुग्विधीयते। परन्तु, निःस्तोकः इत्यत्र उत्तरपदपरकत्वाऽभावात् न अलुक्। तत्र सूत्रेण निपातनेन ज्ञापनेन च अलुग्विहितः। वार्तिककारैरपि क्वचित् वार्तिकैः अलुक् साधितः। तत्र तृतीयाविभक्तेः, चतुर्थीविभक्तेः, पञ्चमीविभक्तेः, षष्ठीविभक्तेश्च अलुक् विहितः। द्वितीयाविभक्तेः अलुक् नैव कृतः। तत्र सूत्रेण अलुग्विधानं यथा, "वैयाकरणाख्यायां चतुर्थ्याः" (अष्टाध्यायी, ६.३.७) इति सूत्रेण अलुग्विधानम्। आत्मनेपदमित्यत्र अनेन सूत्रेण चतुर्थीविभक्तेः अलुग्विहितः। "ब्राह्मणाच्छंसिन उपसंख्यानम्" (सिद्धान्तकौमुदी, वार्तिकम्- ३८७८) इति वार्तिकेन पञ्चम्या अलुग्विहितः । ब्राह्मणे विहितानि शस्त्राणि उपचारात् ब्राह्मणानि इत्युच्यन्ते। ब्राह्मणानि शंसतीति इत्यत्र द्वितीयार्थे पञ्चमी वर्तते। पूर्वोक्तवार्तिकेन पञ्चम्याः अलुकि ब्राह्मणाच्छंसी इति रूपम्। "पुंसानुजो जनुषान्ध इति च" (सिद्धान्तकौमुदी, वार्तिकम्- ३८८१) इति वार्तिकेन निपातनात् तृतीयाया अलुग्विहितः । अत्र वार्तिके तृतीयाविभक्तेः अलुकि कृते निष्पन्नं रूपमेव पठितमस्ति। तस्मात्, अनेन वार्तिकेन निपातनात् पुंसानुजः, जनुषान्ध इत्येतानि रूपाणि सिध्यन्ति। "गवियुधिभ्यां स्थिरः" (अष्टाध्यायी, ८.३.९५) इति सूत्रेण स्थिरघटकसकारस्य षत्वं विधीयते। परन्तु, सूत्रे गवि, युधि इति सप्तम्यन्तस्य पठनेन ज्ञाप्यते यत् सप्तम्याः अलुक् भवति। एवं, गविष्ठिरः, युधिष्ठिर इत्यत्र ज्ञापनेन लुक् विहित इति मन्तव्यम्। एवं, सूत्रेण, वार्तिकेन, निपातनेन, ज्ञापनेन च अलुग्विहितः।

## *अलुग्विधिप्रवृत्तिबीजम्*

तत्र संज्ञाविशेषमर्थविशेषं शब्दविशेषं वाश्रित्य सूत्रकारैः वार्तिककारैश्च अलुग्विहितः। यथा, "पञ्चम्याः स्तोकादिभ्यः" (अष्टाध्यायी, ६.३.२) इत्यनेन शब्दमात्राश्रयणेन अलुग्विहितः। किञ्च, "मनसः संज्ञायाम्" (अष्टाध्यायी, ६.३.४) इति सूत्रेण संज्ञायां सत्यां तृतीयाया अलुग्विधीयते । मनसा गुप्ता इति विग्रहे समासे संज्ञायां तृतीयाया अलुकि मनसागुप्ता इति समस्तपदं निष्पद्यते। संज्ञाभावे तु तृतीयाया अलुगभावे मनोगुप्ता इति समस्तपदं भवति।

संज्ञाविशेषे अर्थविशेषे वा अलुग्विधानमिदं विकल्पेनापि कृतमस्ति । अस्मिन् स्थले विभक्तेः लुकि अलुकि वा संज्ञाविशेषोऽर्थविशेषो वा तिष्ठत्येव । यथा, "तत्पुरुषे कृति बहुलम्" (अष्टाध्यायी, ६.३.१४) इति सूत्रेण संज्ञायां सप्तम्याः विकल्पेन अलुग्विधीयते । कर्णे जपतीति विग्रहे विभक्तेरलुकि कर्णेजप इति समस्तपदम्, विभक्तेरलुगभावे कर्णजप इति समस्तपदं निष्पद्यते। अत्र कर्णेजपः, कर्णजप इत्युभाभ्यामपि संज्ञा अवगम्यते ।

अर्थविशेषे गम्यमाने अलुकः विधानमपि जातम्। "षष्ठ्या आक्रोशे" (अष्टाध्यायी, ६.३.२१) इति सूत्रेण निन्दार्थे गम्यमाने षष्ठीविभक्तेरलुग्विधीयते। यथा चौरस्य कुलमिति विग्रहे निन्दायां गम्यमानायां षष्ठ्या अलुकि चौरस्यकुलमिति समस्तपदं निष्पद्यते।

एवं, संज्ञामात्रे अर्थविशेषे वा अलुग्विधानमपि विकल्पेन विहितमस्ति। कुत्रचिदर्थविशेषस्य संज्ञायाः सत्त्वे एव अलुग्विहितः। कुत्रचिच्च अर्थविशेषस्य सत्त्वेऽपि विकल्पेन अलुग्विहितः। तेन अलुकि सति असति वा अर्थविशेषो वर्तमानो भवति। एवम्, अलुक्समासस्य प्रवृत्तेः निर्दिष्टं निमित्तं

प्रतिपादयितुं न शक्यते। तस्मात्, आचार्यपाणिनिकालिकप्रयोग एव अलुग्विधिप्रवृत्तौ निमित्तभूतः सूत्रकाराणामित्येव राद्धान्तत्वेन स्वीकार्यं भवति।

### *समस्ताऽसमस्तयोः भेदग्रहः*

स्तोकात् मुक्तः इति विग्रहे "स्तोकान्तिकदूरार्थकृच्छ्राणि क्तेन" (अष्टाध्यायी, २.१.३९) इति सूत्रेण पञ्चमीतत्पुरुषसमासो विधीयते। ततः स्तोक ङसि मुक्त सु इति अलौकिकविग्रहवाक्यस्य प्रातिपदिकसंज्ञायां "सुपो धातुप्रातिपदिकयोः" (अष्टाध्यायी, २.४.७१) इति सूत्रेण समुदायघटकयोः ङसिसुविभक्त्योः लोपः प्राप्तः। अत्र सुविभक्तेः लुक् जायते। परन्तु, "पञ्चम्याः स्तोकादिभ्यः" (अष्टाध्यायी, ६.३.२) इति सूत्रेण स्तोकशब्दाद्विद्यमानस्य ङसिविभक्तेः अलुक् विधीयते। अत्र स्तोकात् मुक्त इति समस्तपदम्। समासे संहिता नित्या कर्तव्या भवति। तदुक्तं प्राचीनैः-

"संहितैकपदे नित्या नित्या धातूपसर्गयोः।
नित्या समासे वाक्ये तु सा विवक्षामपेक्षते"॥ इति।

संहितायामादौ "झलां जशोऽन्ते" (अष्टाध्यायी, ८.२.३९) इति सूत्रेण तकारस्य जश्त्वे दकारो जायते। ततः स्तोकाद् मुक्त इति दशायां "यरोऽनुनासिकेऽनुनासिको वा" (अष्टाध्यायी, ८.४.४५) इति सूत्रेण पदान्तस्य यरः दकारस्य अनुनासिके नकारे कृते स्तोकान्मुक्तः इति समस्तं रूपं निष्पद्यते। एवं, समासे संहितायाः नित्यत्वात् स्तोकान्मुक्तः इत्येकविधमेव रूपं निष्पन्नं भवति।

तत्र "स्तोकान्तिकदूरार्थकृच्छ्राणि क्तेन" (अष्टाध्यायी, २.१.३९) इति सूत्रेण विकल्पेन समासो विधीयते। स्तोकात् मुक्त इत्यत्र समासाऽभावपक्षे रूपद्वयं निष्पन्नं भवति। तकारस्य पूर्वोक्तप्रक्रियायां नकारे सति स्तोकान् मुक्तः इति एकं रूपम्। अपरत्र अनुनासिकाऽभावपक्षे स्तोकाद् मुक्तः इति रूपम्। अत्र वर्णानां संयोगेन लेखनेन स्तोकान्मुक्तः, स्तोकाद्मुक्तः इति दृश्यं रूपद्वयं सेत्स्यति।

एवं, समासे सति स्तोकान्मुक्तः इति रूपं, समासाऽभावे स्तोकान्मुक्तः, स्तोकाद्मुक्तः इति द्वे रूपे। अत्र समस्ते असमस्ते च स्तोकान्मुक्तः इति समानमेव रूपं निष्पन्नं भवति। तत्रापि प्रयोक्ता यदा असमस्तस्य संयुक्ततया प्रयोगं न करोति, तदा स्तोकान्मुक्तः इति दृश्यं रूपं, समासे तु सर्वदैव स्तोकान्मुक्तः इति संयुक्ततयैव प्रयोगः। एवं, असमस्तस्य असंयुक्ततया प्रयोगे समस्ते असमस्ते च दृश्यमानरूपयोः भेदः सुतरां सेत्स्यति। समासे स्तोकान्मुक्तः, असमासे स्तोकान् मुक्तः इति दृश्यमानयोः रूपयोः भेदः स्पष्टं प्रतीयते। परन्तु, असमस्तस्य प्रयोगः वक्ता यदा संयुक्ततया करोति, तदा समस्ते असमस्ते च स्तोकान्मुक्त इत्येकमेव रूपम्। अत्र समाने एव रूपे समस्ताऽसमस्तयोः भेदज्ञानं कथं भवतीति संशयोऽत्र सर्वेषामेव जायते।

अत्र संशयकर्तृभेदे समाधानमपि भिद्यते। वैयाकरणेतराणां वैयाकरणानाञ्च कृते पृथक् समाधानं कल्पयितुं शक्यम्। स्तोकान्मुक्तः इत्यत्र वैयाकरणेतरैः सर्वदैव समस्तरूपमेव अङ्गीक्रियते चेद्वरम्। "सम्भवत्येकपदत्वे अनेकपदकल्पनाया अन्याय्यत्वम्" इति न्यायोऽपि अमुमेव समाधानं समर्थयति। स्तोकान्मुक्तः इत्यत्र समासे स्वीकृते एकपदत्वम्, असमस्ते स्वीकृते पदद्वयमङ्गीकार्यम्। समासे स्वीकृते "सुप्तिङन्तं पदम्" (अष्टाध्यायी, १.४.१४) इति शास्त्रस्य सकृदेव प्रवृत्तिः। असमस्ते स्वीकृते "सुप्तिङन्तं पदम्" (अष्टाध्यायी, १.४.१४) इति शास्त्रस्य असकृत्प्रवृत्तिः कर्तव्या भवति। एवं, समस्ते स्वीकृते मनोगतव्यापारस्य लाघवं वर्तते। एवं, लाघवमूलकतया "सम्भवत्येकपदत्वे अनेकपदकल्पनाया अन्याय्यत्वम्" इति न्याययुक्त्या वैयाकरणेतरैः सर्वथैव स्तोकान्मुक्तः इत्यत्र समस्तपदत्वमङ्गीकार्यम्।

वैयाकरणानां कृते लाघवरूपस्य प्रयोजनस्य सद्भावात् स्तोकान्मुक्तः इत्यत्र समस्तपदत्वमेव अङ्गीकर्तव्यमिति समाधानं कल्पयितुं न शक्यते। वैयाकरणानां स्वरज्ञानस्य सद्भावात् स्वरविशेषस्य सत्त्वाऽसत्त्वाऽभ्यामेव समासः समासाऽभावश्च कल्पनीयो भवति वैयाकरणैः। समासे सति

"समासस्य" (अष्टाध्यायी, ६.१.२२३) इति सूत्रेण अन्तोदात्तस्वरः, असमासे सति स्वरभेदो भवति। एवं, स्वरविशेषस्य अपेक्षायां सत्यां स्तोकान्मुक्तः इत्यत्र कदाचित् समस्तपदत्वं, कदाचित् असमस्तत्वं च कल्पनीयं भवति।

वस्तुतः,स्तोकान्मुक्तः इति रूपस्य साक्षाच्छ्रूयमाणे सति समस्तपदत्वं स्वीकार्यं लाघवदृष्ट्या। अत्र सन्देहाऽभावाय प्रयोक्तुः महत्कार्यं वर्तते। असमस्ते विवक्षिते स्तोकान् मुक्त इत्येव प्रयोगः करणीयः। समस्ते इष्यमाणे तु स्तोकान्मुक्तः इत्येव रूपं प्रयोक्तव्यं भवति। एवं, सन्देहाऽभावाय असमस्तस्थले स्तोकान् मुक्त इति असंयुक्ततया प्रयोगः प्रयोक्तुरुचित इति भाति।

## *उपसंहृतिः*

'मुण्डे मुण्डे मतिर्भिन्ना' इति वचनं समासस्य विभागे क्रियमाणे सुतरां सङ्गच्छते। भेदस्य आधारभेदेन समासस्य विभागोऽपि अनेकधा भवति। तत्र अलौकिकविग्रहवाक्यघटकपूर्वपदोत्तरविभक्तेः लुगलुग्भेदेन लुक्समासः, अलुक्समास इति द्वौ प्रभेदौ समासस्य। शोधप्रबन्धेऽस्मिन् अलुक्समासस्य विधानप्रक्रिया, अलुक्समासप्रयोजनं यथामति प्रतिपादितम्। वस्तुतः, द्वावेव विषयौ मुख्यतया समाहितो अस्मिन् शोधप्रबन्धे। अलुक्समासस्य प्रवृत्तिबीजं यथामति निरूपितम्। किञ्च, समस्ताऽसमस्तयोः समानरूपत्वाद्भेदग्रहोपायोऽपि समाहितः।

## *सहायकग्रन्थसूची*

भट्टोजीदिक्षितः, वैयाकरणसिद्धान्तकौमुदी (द्वितीयभागः), गिरिधरशर्मा, आनन्दशर्मा. (सम्पा.), दिल्ली मोतीलाल बनारसीदास, २०१७।

कौण्डभट्टः, वैयाकरणभूषणसारः, आद्याप्रसादमिश्रः.( सम्पा.), वाराणसी, सम्पूर्णानन्द संस्कृत विश्वविद्यालयः, १९८८।

वामनजयादित्यौ, काशिकाः, जयशङ्करलालत्रिपाठी, सुधाकरमालवीयः (सम्पा ), वाराणसीः, तारा प्रिंटिंग वर्क्स, १९८६।

पतञ्जलिः, पाणिनीयव्याकरणमहाभाष्यम्, श्रीभार्गवशास्त्री.( सम्पा.), दिल्ली, चौखम्बा संस्कृत प्रतिष्ठान, १९८७।

डा.विजयप्रसादत्रिपाठी, समासवृत्तिविमर्शः, डा.विजयप्रसादत्रिपाठी.( सम्पा ), वाराणसी, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, १९९१।

KIRAṆĀVALĪ
Journal of Sanskrit Research Foundation
The New Trivandrum Sanskrit Series Vol. XIV.
Book III-IV
JULY – DECEMBER 2022

ISSN 0975-4067

kiranāvali
9 770975 406008 >

Printed and published by: Dr.C.S.Sasikumar, Secretary, Sanskrit Research Foundation, Thiruvananthapuram, for Sanskrit Research Foundation, Thiruvananthapuram-36
Sanskritresearchfoundation@gmail.com